दिनाङ्क :-15.03.2025

प्रात: - 06:55

## अथ वार्ताः

### अमितशाह: असममिजोरमयो: यात्रा

केन्द्रीयमन्त्री अमितशाह: अद्य असमराज्ये विभिन्नानां विकासात्मकपरियोजनानाम् उद्धाटनं करिष्यति। असौ ह्य: सायंकाले गोलाघाटनगरं सम्प्राप्तवान्। श्री शाह: गोलाघाटजनपदे डेरगांवस्थले मुख्यमन्त्रिण: हिमन्त-बिस्वसरमा-इत्येतस्य केन्द्रीयजलपोत स्थानक-जलमार्ग-मन्त्रिण: सर्बानन्दसोनोवालस्य च उपस्थित्याम् अत्याधुनिकस्य लाचित-बरफुकन-आरक्ष्यकादम्या: उद्धाटनं विधास्यति अथ च आरक्ष्यकादम्या: एव आवासपरियोजनानाम् आधारशिलां स्थापयिष्यति। गृहमन्त्री अद्य मध्याह्ने मिजोरमनगरं प्रति यास्यति तदनु आइजोलनगरस्य मध्यत: जोखावसंग इत्यत्र असम-राइफल्स-बेस इत्येतस्य स्थानान्तरणसम्बद्धे एकस्मिन् समारोहे सहभागं करिष्यति । श्व: श्रीशाह: कोकराझार-जनपदस्य डोटमास्थले ऑल-बोडो-स्टूडेन्ड-यूनियन-इत्येतस्य सप्तपञ्चाशत्तमं वार्षिकसम्मेलनं सम्बोधयिष्यति तदनु अष्ट पूर्वोत्तरराज्यानां मुख्यमन्त्रिभिस्साकं गुवाहाटीनगरे पूर्वोत्तरराज्येषु नवीनापराधिकविधे: कार्यान्वयनस्य समीक्षां विधास्यति।

### महाराष्ट्रम्

महाराष्ट्रराज्यम् प्रधानमन्त्री-सूर्य-घर-योजनाया: अन्तर्गतं समग्रे हि देशे द्वितीयं स्थानं लब्धम्। इमां सूचनां राज्यस्यास्य मुख्यमन्त्री देवेन्द्रफडणवीस: सामाजिकान्तर्जालसन्देशपटले प्रदत्तवान्। अस्या: योजनाया: अन्तर्गतं षट्त्रिंशदधिक-नवशतोत्तर-द्विनवतिसहस्राधिकैकलक्षं यावत् सौरोर्जापरियोजना: स्थापयित्वा महाराष्ट्रराज्येन लक्ष्यमिदम् अधिगतम् ।

श्रीफडणवीस: इत्यपि सूचितवान् यत् महाराष्ट्रराज्यम् अस्मै प्रक्रमाय सक्रियतया योगदानं दास्यति। अस्या: योजनाया: अन्तर्गतं साम्प्रतं यावत् नवसहस्राधिकदशलक्षं यावत् सौरोर्जापरियाजना: स्थापिता:।

## उपभोक्ता दिवस:

अद्य विश्वोपभोक्त्रधिकार-दिवस: परिपाल्यते। अयं दिवस: प्रतिवर्षं मार्चमास्य पञ्चदशदिनाङ्के उपभोक्तृणाम् अधिकारान् सरंक्षयितुं सुरक्षा: स्थापयितुं च आमान्यते। अस्मिन् वर्षे अस्य दिवसस्य शीर्षको विद्यते -सन्धारणीय जीवनशैल्यै न्यायोचितपरिवर्तनमिति।

## वैधप्रमाणपत्रम्

भारतस्य खननक्षेत्रस्य संवर्धनाय खननमन्त्रालयेन गोवाप्रशासनस्य सहयोगेन प्रथमवारम् अन्वेषणानुज्ञापत्राणां सघोषविक्रयणं समारब्धम्। केन्द्रीय-कृष्णाङ्गार-खनिमन्त्री जी. किशनरेड्डी इत्येष: गोवाराज्यस्य मुख्यमन्त्री डॉ. प्रमोदसांवत: गोवाराज्ये एकस्मिन् ऐतिहासिके कार्यक्रमे अस्य उपक्रमस्य अनावरणम् अकुरूताम् ।एतस्मिन् सघोषविक्रये त्रयोदशसङ्ख्यकेभ्य: अन्वेषणानुज्ञापत्र- सम्बद्धेभ्य: खण्डेभ्य: ध्यानं प्रदास्यते येषु दुर्लभमृदातत्व-हीरक-ताम-इत्यादय: खानिजपदार्था: सम्मिलिता: भविष्यन्ति ।

## गोयला: संयुक्तव्यापार:

वाणिज्योद्योगमन्त्री पीयूषगोलय: कथितवान् यत् असौ अमेरीकीयव्यापारप्रतिनिधिना जैमीसन-ग्रीर-इत्यमुना साकं पारस्परिक-रूपेण लाभकारि-द्विपक्षीय- व्यापार-सन्धिपत्रे एकां दूरदर्शिनी-चर्चा सम्पादितवान्।

## पाकिस्तान रेल अपहरण:

घटिते रेलयानापहरणे भारतस्य नवदिल्ल्यां सहभाग: आसीत् इति पाकिस्तानदेशस्य आरोप: आधारहीन: इति भारतं सूचितवान् ।

पाकिस्तानपक्षस्य भाषणेषु सञ्चारमाध्यमानां प्रश्नानां प्रत्युत्तरे विदेशमन्त्रालयस्य प्रवक्ता रणधीर- जैसवाल: अवदत् यत् वैश्विकातङ्कवादस्य केन्द्रबिन्दुः कुत्र अस्ति इति सम्पूर्णम् विश्वम् विजानाति इति ।

।। इति वार्ता:।।